संस्कृतवार्ता:

दिनाङ्क :-25.02.2025 प्रात: - 06:55

अथ वार्ता:

**राष्ट्रपति:- राज्यत्रयप्रवास:**

राष्ट्रपतिपदासीना द्रौपदीमुर्मु: अद्यारभ्य त्रयाणां राज्यानां पञ्चदिवसीययात्रारता भविष्यति। राष्ट्रपति: बिहार-मध्यप्रदेश-गुजरात-प्रदेशानां यात्रायां भविष्यति इयं यात्रा मार्चमासे प्रथमे दिनाङ्के सम्पन्नतां प्राप्स्यति। राष्ट्रपति: अद्य बिहारराज्ये पटना-चिकित्सकीय-महाविद्यालयस्य शताब्दी-समाराहे सम्मिलिता भविष्यति। तदनु असौ श्व: मध्यप्रदेशस्य छतरपुरस्य गढायां बागेश्वर-जन-सेवा-समितिद्वारा आयोजिते सामूहिक-विवाह-समारोहे सम्मिलिता भविष्यति। श्व: राष्ट्रपति: गुजरातराज्यस्य केवड़ियायां स्टैच्यू-ऑफ-यूनिटी-इत्यत्र श्रद्धाञ्जलिम् समर्पय नर्मदारतीं द्रक्ष्यति। गुरुवासरे राष्ट्रपति: केवड़ियायाम् एकता-कौशल-विकास-केन्द्रं प्रति यास्यति। अहमदाबादनगरे च राष्ट्रिय-डिजाइनइति-संस्थानस्य चतुश्चत्वारिंशत्तमे दीक्षान्तसमारोहे सम्मिलिता भविष्यति। शुक्रवासरे असौ गांधीनगरे राष्ट्रिय-न्यायवैद्यकीय-विज्ञान-विश्वविद्यालयस्य तृतीयं दीक्षान्तसमारोहे भागं ग्रहीष्यति। तस्मिन्नेव दिवसे राष्ट्रपति: भुजनगरे स्मृतिवन-भूकम्प-स्मारकं गमिष्यति। शनिवासरे च राष्ट्रपति: यूनेस्को इति-विश्व-रिक्थ-स्थलस्य धोलावीरा इत्याख्यस्य भ्रमणं विधास्यति।

**प्रधानमन्त्री-असमयात्रा**

प्रधानमन्त्री नरेन्द्रमोदी अद्य प्रात:काले सार्धदशवादने असम-एडवान्टेज इत्येतस्य द्वितीयसंस्करणस्य निवेश-अवसंरचना-शिखर-सम्मेलनस्य उद्घाटनं करिष्यति। एतस्मिन् द्विदिवसात्मके शिखरसम्मेलने एकम् उद्घाटनसत्रम् सप्तमन्त्रिस्तरीयं सत्रं चतुर्दश विषयगतानि सत्राणि स्माविष्टानि सन्तीति। येषु औद्योगिक-विकासे-वैश्विक-व्यापारं-सहभागितायाम् असमस्य च जीवन्ते सूक्ष्म-लघु-माध्यमोद्योगे च ध्यानकेन्द्रितं स्यादिति। अपि च यस्मिन् चत्वारिंशदधिक-द्विशत-सङ्ख्यका: प्रदर्शका: भागं भजिष्यन्ति। असमप्रदेशस्य राज्यपाल: एल.पी. आचार्य: विदेशमन्त्री एस्. जयशङ्कर: मुख्यमन्त्री हिमन्तबिस्वासरमा: केन्द्रीय-जलपोस्थानक-जलमार्ग-मन्त्री सर्बानन्दसोनोवाल: नैकेषां देशानां च व्यावसायिक-प्रतिनिधिमण्डलान्यपि भागं ग्रहीष्यन्ति।

**विदेशमन्त्री**

विदेशमन्त्री डॉ. एस्. जयशङ्कर: कथितवान् यत् भारतेन सर्वदैव मानवाधिकाराणां वैश्विकप्रचारे संरक्षणे च सक्रियतया भूमिका निभालिता। जिनेवानगरे संयुक्त-राष्ट्र-मानवाधिकार-परिषद: अष्टपञ्चाशत्तमं सत्रम् आभासियमाध्यमेन संबोधयन् डॉ. जयशङ्कर: प्रोदीरितवान् यत् भारतस्य दृक्पात: स्वसहभागितानां अनुरूप-क्षमता-निर्माणे अपि च मानवसंसाधनस्य आधारभूत-संरचनाया: च सुदृढीकरणे सुस्थिरो वर्तते। असौ सबलतया कथितवान् यत् भारतम् आतङ्कवादं विरुध्य प्रति शून्य-सहिष्णुतया: समर्थनं करिष्यते।

**महाकुम्भवार्ता:**

तीर्थराजे प्रयागराजे ऐतिहासिकस्य प्रचल्यमानस्य महाकभस्य श्व: महाशिवरात्र्य: पावनावसरे आधिकारिकरूपेण समापनं भविष्यति। शुभावसरं एनं दिव्यं भव्यं च कर्तुं प्रशासनेन व्यापकी व्यवस्था विहितास्ति। श्रद्धालूनां सुरक्षायै संरक्षायै च अनेके पदक्षेपा: उत्थपिता:। प्रयागराजस्य जनपदाधिकारी रवीन्द्रकुमार-मांदड: सूचितवान् यत् श्रद्धालूनां संरक्षायै सुविधायै च प्राथमिकता प्रदीयते।

**क्रिकेट**

पुरुषणां आई.सी.सी. चैम्पियन्स-ट्रॉफी-इत्येतस्यां क्रिकेट-प्रतिस्पर्धायां ह्य: रात्रौ रावलपिण्डीनगरे इत्यत्र न्यूजीलैण्डदलेन बाङ्ग्लादेशदलं पञ्चस्तोभै: पराजितम्। एतेन साकमेव भारतीयदलम् न्यूजीलैण्डदलञ्च उपान्यचक्रे प्रविष्टवती।

।। इति वार्ता:।।